श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकचत्वारिंशं दशकम् ॥

## पूतनाशरीरदाहवर्णनम्, गोपीनां बाललालनकौतुकवर्णनम् च

व्रजेश्वरः शौरिवचो निशम्य
समाव्रजन्नध्वनि भीतचेताः।
निष्पिष्टनिश्शेषतरुं निरीक्ष्य
कञ्चित्पदार्थं शरणं गतस्त्वाम् ॥ **41.1** ॥

निशम्य गोपीवचनादुदन्तं
सर्वेऽपि गोपा भयविस्मयान्धाः।
त्वत्पातितं घोरपिशाचदेहं
देहुर्विदूरेऽथ कुठारकृत्तम् ॥ **41.2** ॥

त्वत्पीतपूतस्तनतच्छरीरात्
समुच्चलन्नुच्चतरो हि धूमः।
शङ्कामधादागरवः किमेष
किं चान्दनो गौल्गुलवोऽथवेति ॥ **41.3** ॥

मदङ्गसङ्गस्य फलं न दूरे
क्षणेन तावत् भवतामपि स्यात्।
इत्युल्लपन् वल्लवतल्लजेभ्यः
त्वं पूतनामातनुथाः सुगन्धिम् ॥ **41.4** ॥

चित्रं पिशाच्या न हतः कुमारः
चित्रं पुरैवाकथि शौरिणेदम्।

इति प्रशंसन् किल गोपलोको
भवन्मुखालोकरसे न्यमाङ्क्षीत् ॥ **41.5** ॥

दिने दिनेऽथ प्रतिवृद्धलक्ष्मी -
रक्षीणमाङ्गल्यशतो व्रजोऽयम्।
भवन्निवासादयि वासुदेव
प्रमोदसान्द्रः परितो विरेजे ॥ **41.6** ॥

गृहेषु ते कोमलरूपहास -
मिथः कथासङ्कुलिताः कमन्यः।
वृत्तेषु कृत्येषु भवन्निरीक्षा -
समागताः प्रत्यहमत्यनन्दन् ॥ **41.7** ॥

अहो कुमारो मयि दत्तदृष्टिः
स्मितं कृतं मां प्रति वत्सकेन।
एह्येहि मामित्युपसार्य पाणी
त्वयीश किं किं न कृतं वधूभिः ॥ **41.8** ॥

भवद्वपुः स्पर्शनकौतुकेन
करात्करं गोपवधूजनेन।
नीतस्त्वमाताम्रसरोजमाला -
व्यालम्बिलोलम्बतुलामलासीः ॥ **41.9** ॥

निपाययन्ती स्तनमङ्कगं त्वां
विलोकयन्ती वदनं हसन्ती।
दशां यशोदा कतमान्न भेजे
स तादृशः पाहि हरे गदान्माम् ॥ **41.10** ॥

॥ इति श्रीमन्नारायणीये एकचत्वारिंशं दशकं समाप्तम् ॥